M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 158/1584

Title Purusha Sheersha

Pata

158

\+ 158 a

:	Puruṣha Sheersha	:	Title
:	:	:	Author
:	:	:	Editor
:	:	:	Year, Vols.
:	:	:	Publisher
158	:	:	Remarks

\+ 158 a

158

श्रीगणेशायनमः॥हरिः ॐम्॥सहस्त्र
शीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपाद॥सभू
मिं विश्वतोवृत्वा त्यतिष्ठद्दशांगुलं॥पुरुष
एवेदं सर्वं यद्भूतं यच्च भव्यं॥उतामृतत्व
स्येशानो यदन्नेनातिरोहति॥एतावानस्य

पु॰ सू॰ महिमातोज्यायांश्चपुरुषः ॥ पादोस्यविश्वा
॥१॥ भूतानित्रिपादस्यामृतंदिवि ॥ त्रिपादूर्ध्व
उदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ ततोवि
ष्वङ्व्यक्रामत्साशनानशनेअभि ॥ तस्मा
द्विराळजायतविराजोअधिपुरुषः ॥ सजा ॥१॥

जायत ॥ तस्मादश्वाअजायंतये
केचोभयादतः ॥ गावोहजज्ञिरे
तस्मात्तस्माज्जाताअजावयः ॥२॥
यत्पुरुषंव्यदधुःकतिधाव्यकल्पय
न् ॥ मुखंकिमस्यकौबाहूकाऊरू

पादोऽउच्यते ॥ ब्राह्मणोस्य मुखमा
सीद्बाहू राजन्यः कृतः ॥ ऊरू तदस्य
यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥
चंद्रमा मनसो जातश्चक्षोः सूर्यो २
अजायत ॥ मुखादिंद्रश्चाग्निश्च प्रा

णाद्वायुर्जायत ॥ नाभ्या आसीदं
तरिक्षं शीर्ष्णो द्यौः समवर्तत ॥ प
द्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अ
कल्पयन् ॥ सप्तास्यासन्परिधयः
त्रिः सप्त समिधः कृताः ॥ देवा

यज्ञेन यज्ञमयजंत देवास्तानि धर्मा ४
यद्युरुषः तन्वाना अवध्नन्पुरुषं पशुं ॥
यज्ञेनयज्ञमयजंत देवास्तानि धर्मा
णि प्रथमान्यासन् ॥ तेह नाकं महिमा
नः सचंत यत्र पूर्वे साध्याः संति देवाः ॥३॥
॥इति पुरुषसूक्तं ॥ रामकृष्णार्पणमस्तु ॥

158 9.

१ श्रीगणेशायनमः॥ॐ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात्॥सभू
मिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलं॥वामकरायनमः॥पुरुषएवेदंस
र्वंयद्भूतंयच्चभव्यं॥उतामृतत्वस्येशानोयदन्नेनातिरोहति॥दक्षिण
करायनमः॥एतावानस्यमहिमातोज्यायांश्चपूरुषः॥पादोस्यवि
श्वाभूतानित्रिपादस्यामृतंदिवि॥वामपादायनमः॥त्रिपादूर्ध्वउदै
पुरुषःपादोस्येहाभवत्पुनः॥ततोविष्वङ्व्यक्रामत्साशनानशनेअ गण
भि॥दक्षिणपादायनमः॥तस्माद्विराळजायतविराजोअधिपूरुषः॥ १
सजातोअत्यरिच्यतपश्चाद्भूमिमथोपुरः॥वामजानवेनमः॥यत्पुरुषे

णहविषादेवायज्ञमतन्वत॥वसंतोअस्यासीदाज्यंग्रीष्मइध्मःशरद्धविः
॥दक्षिणजानवेनमः॥तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः॥तेनदेवाअयजं
तसाध्याऋषयश्चये॥वामकट्यैनमः॥तस्माद्यज्ञात्सर्वहुतःसंभृतंपृषदाज्यं
॥पशूंस्तांश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये॥दक्षिणकट्यैनमः॥तस्मा
द्यज्ञात्सर्वहुतऋचःसामानिजज्ञिरे॥छंदांसिजज्ञिरेतस्माद्यजुस्तस्मा
दजायत॥नाभ्यैनमः॥तस्मादश्वाअजायंतयेकेचोभयादतः॥गावोहज
ज्ञिरेतस्मात्तस्माज्जाताअजावयः॥हृदयायनमः॥यत्पुरुषंव्यदधुःकति
धाव्यकल्पयन्॥मुखंकिमस्यकौबाहूकाऊरूपादाउच्यते॥कंठायनमः॥

ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः॥ऊरूतदस्ययद्वैश्यःपद्भ्यांशूद्रो
२ अजायत॥वामबाहवेनमः॥चंद्रमामनसोजातःश्चक्षोःसूर्योअजायत॥
मुखादिंद्रश्चाग्निश्चप्राणाद्वायुरजायत॥दक्षिणबाहवेनमः॥नाभ्याआसी
दंतरिक्षंशीर्ष्णोद्यौःसमवर्तत॥पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकांअक
ल्पयन्॥मुखायनमः॥सप्तास्यासन्परिधयःस्त्रिःसप्तसमिधःकृताः
॥देवायद्यज्ञंतन्वानाअबध्नन्पुरुषंपशुं॥नेत्राभ्यांनमः॥यज्ञेनयज्ञमय गण
जंतदेवाःस्तानिधर्माणिप्रथमान्यासन्॥तेहनाकंमहिमानःसचंतयत्र २
पूर्वेसाध्याःसंतिदेवाः॥शिरसेस्वाहा॥ यत्पुरुषंव्यदधुःकतिधाव्यकल्प